श्रीविष्णुवल्लभ अथवा अष्टषष्टिनामतीर्थस्तोत्रं नरसिंहपुराणे

{॥ श्रीविष्णुवल्लभ अथवा अष्टषष्टिनामतीर्थस्तोत्रं नरसिंहपुराणे ॥}

भरद्वाज उवाच

त्वत्तो हि श्रोतुमिच्छामि गुह्यक्षेत्राणि वै हरेः ।

नामानि च सुगुह्यानि वद पापहराणि च ॥ १॥

सूत उवाच

मन्दरस्थं हरिं देवं ब्रह्मा पृच्छति केशवम् ।

भगवन्तं देवदेवं शङ्खचक्रगदाधरम् ॥ २॥

ब्रह्मोवाच

केषु केषु च क्षेत्रेषु द्रष्टव्योऽसि मया हरे ।

भक्तैरन्यैः सुरश्रेष्ठ मुक्तिकामैर्विशेषतः ॥ ३॥

यानि ते गुह्यनामानि क्षेत्राणि च जगत्पते ।

तान्यहं श्रोतुमिच्छामि त्वत्तः पद्मायतेक्षण ॥ ४॥

किं जपन् सुगतिं याति नरो नित्यमतन्द्रितः ।

त्वद्भक्तानां हितार्थाय तन्मे वद सुरेश्वर ॥ ५॥

श्रीभगवानुवाच

श्रृणुष्वावहितो ब्रह्मन् गुह्यनामानि मेऽधुना ।

क्षेत्राणि चैव गुह्यानि तव वक्ष्यामि तत्त्वतः ॥ ६॥

कोकामुखे तु वाराहं मन्दरे मधुसूदनम् ।

अनन्तं कपिलद्वीपे प्रभासे रविनन्दनम् ॥ ७॥

माल्योदपाने वैकुण्ठं महेन्द्रे तु नृपात्मजम् ।

ऋषभे तु महाविष्णुं द्वारकायां तु भूपतिम् ॥ ८॥

पाण्डुसह्ये तु देवेशं वसुरूढे जगत्पतिम् ।

वल्लीवटे महायोगं चित्रकूटे नराधिपम् ॥ ९॥

निमिषे पीतवासं च गवां निष्क्रमणे हरिम् ।

शालग्रामे तपोवासमचिन्त्यं गन्धमादने ॥ १०॥

कुब्जागारे हृषीकेशं गन्धद्वारे पयोधरम् ।

गरुडध्वजं तु सकले गोविन्दं नाम सायके ॥ ११॥

वृन्दावने तु गोपालं मथुरायां स्वयम्भुवम् ।

केदारे माधवं विन्ध्याद्वाराणस्यां तु केशवम् ॥ १२॥

पुष्करे पुष्कराक्षं तु धृष्टद्युम्ने जयध्वजम् ।

तृणबिन्दुवने वीरमशोकं सिन्धुसागरे ॥ १३॥

कसेरटे महाबाहुममृतं तैजसे वने ।

विश्वासयूपे विश्वेशं नरसिंहं महावने ॥ १४॥

हलाङ्गरे रिपुहरं देवशालां त्रिविक्रमम् ।

पुरुषोत्तमं दशपुरे कुब्जके वामनं विदुः ॥ १५॥

विद्याधरं वितस्तायां वाराहे धरणीधरम् ।

देवदारुवने गुह्यं कावेर्यां नागशायिनम् ॥ १६॥

प्रयागे योगमूर्तिं च पयोष्ण्यां च सुदर्शनम् ।

कुमारतीर्थे कौमारं लोहिते हयशीर्षकम् ॥ १७॥

उज्जयिन्यां त्रिविक्रमं लिङ्गकूटे चतुर्भुजम् ।

हरिहरं तु भद्रायां दृष्ट्वा पापात् प्रमुच्यते ॥ १८॥

विश्वरूपं कुरुक्षेत्रे मणिकुण्डे हलायुधम् ।

लोकनाथमयोध्यायां कुण्डिने कुण्डिनेश्वरम् ॥ १९॥

भाण्डारे वासुदेवं तु चक्रतीर्थे सुदर्शनम् ।

आढ्ये विष्णुपदं विद्याच्छूकरे शूकरं विदुः ॥ २०॥

ब्रह्मेशं मानसे तीर्थे दण्डके श्यामलं विदुः ।

त्रिकूटे नागमोक्षं च मेरुपृष्ठे च भास्करम् ॥ २१॥

विरजं पुष्पभद्रायां बालं केरलके विदुः ।

यशस्करं विपाशायां माहिष्मत्यां हुताशनम् ॥ २२॥

क्षीराब्धौ पद्मनाभं तु विमले तु सनातनम् ।

शिवनद्यां शिवकरं गयायां च गदाधरम् ॥ २३॥

सर्वत्र परमात्मानं यः पश्यति स मुच्यते ।

अष्टषष्टिश्च नामानि कथितानि मया तव ॥ २४॥

क्षेत्राणि चैव गुह्यानि कथितानि विशेषतः ।

एतानि मम नामानि रहस्यानि प्रजापते ॥ २५॥

यः पठेत् प्रातरुत्थाय श्रृणुयाद्वापि नित्यशः ।

गवां शतसहस्रस्य दत्तस्य फलमाप्नुयात् ॥ २६॥

दिने दिने शुचिर्भूत्वा नामान्येतानि यः पठेत् ।

दुःस्वप्नं न भवेत् तस्य मत्प्रसादान्न संशयः ॥ २७॥

अष्टषष्टिस्तु नामानि त्रिकालं यः पठेन्नरः ।

विमुक्तः सर्वपापेभ्यो मम लोके स मोदते ॥ २८॥

द्रष्टव्यानि यथाशक्त्या क्षेत्राण्येतानि मानवैः ।

वैष्णवैस्तु विशेषेण तेषां मुक्तिं ददाम्यहम् ॥ २९॥

सूत उवाच

हरिं समभ्यर्च्य तदग्रसंस्थितो हरिं स्मरन् विष्णुदिने विशेषतः ।

इमं स्तवं यः पठते स मानवः प्राप्नोति विष्णोरमृतात्मकं पदम् ॥ ३०॥

इति श्रीनरसिंहपुराणे आद्ये धर्मार्थमोक्षदयिनि विष्णुवल्लभे

पञ्चष्टितमोऽध्यायः ॥ ६५॥

From Narasimhapurana adhyAya 65.

https://archive.org/details/NarsimhaPuranGitapress

Proofread by Singanallur Ganesan singanallur at gmail.com

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Stotram Digitalized By Sanskritdocuments.org

% File name : viShNuvallabhAShTaShaShTinAmatIrthastotra.itx
% Location : doc_vishhnu
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Proofread by : Singanallur Ganesan singanallur at gmail.com
% Translated by : https://archive.org/details/NarsimhaPuranGitapress
% Description-comments : Narasimhapurana adhyAya 65.
% Latest update : June 29, 2013
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 13, 2015] at Stotram Website